प्लीहा, स्त्री, (प्लिह + कः। पृषोदरादित्वात् दीर्घः। स्त्रियां टाप्।) प्लिहरोगः। यथा, यकृत्प्लीहे च सम्बन्धे। इति वालकास्यः। इत्यमरटीकायां भरतः॥

प्लीहा, [न्] पुं, (प्लिह + "श्वनुक्षन्पूषन्प्लीहन्क्लिदिति।" उणा० १। १५८। इति कनिन्प्रत्ययेन साधुः।) कुक्षिवामपार्श्वस्थमांसखण्डम्। पिला इति ख्यातम्। तत्पर्य्यायः। गुल्मः २ प्लिहा ३। इत्यमरभरतौ॥ अस्य निदानम्।

"विदाह्यभिष्यन्दिरतस्य जन्तोः
प्रदुष्टमत्यर्थमसृक् कफश्च।
प्लीहाभिवृद्धिं कुरुतः प्रवृद्धौ
प्लीहोत्थमेतज्जठरं वदन्ति॥
तद्वामपार्श्वे परिवृद्धिमेति
विशेषतः सीदति चातुरोऽत्र।
मन्दज्वराग्निः कफपित्तलिङ्गै-
रुपद्रुतः क्षीणबलोऽतिपाण्डुः॥"
इति माधवकरः॥ * ॥

रक्तजस्य तस्य लक्षणम्।
"क्लमो भ्रमो विदाहश्च वैवर्ण्यं गात्रगौरवम्।
मोहो रक्तोदरत्वञ्च ज्ञेयं रक्तजलक्षणम्॥" * ॥
पैत्तिकस्य तस्य लक्षणम्।
"सज्वरः सपिपासश्च सदाहो मोहसंयुतः।
पीतगात्रो विशेषेण प्लीहा पैत्तिक उच्यते॥"
श्लैष्मिकस्य तस्य लक्षणम्।
"प्लीहा मन्दव्यथः स्थूलः कठिनो गौरवान्वितः।
अरोचकयुतः शीतः प्लीहा कफज उच्यते॥"
वातिकस्य तस्य लक्षणम्।
"नित्यमानद्धकोष्ठः स्यान्नित्योदावर्त्तपीड़ितः।
वेदनाभिः परीतश्च प्लीहा वातिक उच्यते॥
दोषत्रितयरूपाणि प्लीह्नि साध्ये भवन्ति हि॥"
अथ तस्य चिकित्सा।
"प्रातर्भुक्तिः क्षारः क्षीरेणोद्धितसुक्तिजः।
तथा दुग्धेन प्रातर्वा पिप्पल्यः प्लीहशान्तये॥१॥
अर्कपत्रं सलवणं पुटदग्धं सुचूर्णितम्।
निहन्ति मस्तुना पीतं प्लीहानमपि दारुणम्॥२॥
हिङ्गु त्रिकटुकं कुष्ठं यवक्षारञ्च सैन्धवम्।
मातुलुङ्गरसोपेतं प्लीहशूलहरं रजः॥३॥
पालाशक्षारतोयेन पिप्पली परिभाविता।
प्लीहगुल्मार्त्तिशमनी वह्निमान्द्यहरी मता॥४॥
रसेन जम्बीरफलस्य शङ्ख-
नाभीरजः पीतमवश्यमेव।
शाणप्रमाणं शमयेदशेषं
प्लीहामयं कुम्भसमानमाशु॥५॥
शरपुङ्खमूलकल्कस्तक्रेणालोड़ितः पीतः।
प्लीहानं यदि न हरते शैलोऽपि तदा जले
प्लवते॥६॥
सुपक्वसहकारस्य रसः क्षौद्रसमन्वितः।
पीतः प्रशमयत्येव प्लीहानं नेह संशयः॥७॥
सुखिन्नं शाल्मलीपुष्पं निशापर्य्युषितं नरः।
राजिकाचूर्णसंयुक्तं खादेत् प्लीहोपशान्तये॥"८॥
इति भावप्रकाशः॥ * ॥

"पिप्पलीमधुपानाच्च यथा मधुरभोजनात्।
प्लीहा विनश्यते रुद्र इति॥९॥
केतकीपत्रजं क्षारं घृतेन सह भक्षयेत्।
तक्रेण शरपुङ्खाभ्यां पीत्वा प्लीहां विना-
शयेत्॥" १०॥
इति गारुड़े १८७। १८८ अध्यायौ॥

("शोणितकफप्रसादजं हृदयं तदाश्रया हि धमन्यः प्राणवहाः। तस्याधो वामतः प्लीहा फुप्फुसश्च॥" इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥ अस्य सहेतुकलक्षणादीनि यथा,—
"अशितस्यातिसंक्षोभाद् यानयानातिचेष्टितैः।
अतिव्यवायभाराध्ववमनव्याधिकर्षणैः॥
वामपार्श्वाश्रितः प्लीहा च्युतः स्थानात् प्रवर्द्धते।
शोणितं वा रसादिभ्यो विवृद्धन्तं विवर्द्धयेत्॥
इति तस्य प्लीहा कठिनोऽष्ठीलेवादौ वर्द्धमानः कच्छपसंस्थान उपलभ्यते स चोपेक्षितः क्रमेण कुक्षिं जठरमग्न्यधिष्ठानञ्च परिक्षिपन्नुदरमभिनिर्व्वर्त्तयति॥
तस्य रूपाणि। दौर्ब्बल्यारोचकाविपाकवर्च्चोमूत्रग्रहतमःपिपासाङ्गमर्द्दच्छर्द्दिमूर्च्छाङ्गसादकासश्वासमृदुज्वरानाहाग्निनाशकार्श्यास्यवैरस्यपर्व्वभेदकोष्ठवातशूलान्यपि चोदरमरुणवर्णं विवर्णं वा नीलहरितहारिद्रराजिमच्च भवति।"
चिकित्सास्य यथा,—
"पिप्पलीं तित्वकं हिङ्गु नागरं हस्तिपिप्प-
लीम्।
भल्लातकं शिग्रुफलं त्रिफलां कटुरोहिणीम्॥
देवदारुहरिद्रे द्वे सरलातिविषे वचाम्।
कुष्ठं मुस्तं तथा पञ्च लवणानि प्रकल्प्य च।
दधिसर्पिर्वसातैलमज्जयुक्तानि दाहयेत्॥
अन्तर्धूममतः क्षारात् विड़ालपदकं पिबेत्।
मदिरा दधिमण्डोष्णजलारिष्टसुरासवैः॥
हृद्रोगं श्वयथुं गुल्मं प्लीहार्शो जठराणि च।
विषूचिकामुदावर्त्तं वाताष्ठीलाञ्च नाशयेत्॥"
इति चरके चिकित्सास्थानेऽष्टादशेऽध्याये॥)

प्लीहारिः, पुं, (प्लीहाया अरिः प्रशमकत्वात्।) अश्वत्थवृक्षः। इति शब्दचन्द्रिका॥ (प्लीहनाशकवटिकौषधविशेषः। यथा,—
"द्विकर्षं लौहभस्मापि कर्षं ताम्रं प्रदापयेत्।
शुद्धसूतं तथा गन्धं कर्षमानं भिषग्वरः॥
मृगाजिनं पलं भस्म त्रिव्याकाङ्क्षितश्च पलम्।
एवं भागक्रमेणैव कुर्य्यात् प्लीहारिसंज्ञकम्॥
नवगुञ्जामितं खादेदयं नित्यं हि पूतवान्।
प्लीहानं यकृतं गुल्मं हन्त्यवश्यं न संशयः॥"
इति प्लीहारिरसः॥ * ॥
इति वैद्यकरसेन्द्रसंग्रहे प्लीहाधिकारे॥)

प्लीहाशत्रुः, पुं, (प्लीहायाः शत्रुः।) प्लीहशत्रुः। प्लीहघ्नवृक्षः। इति केचित्॥

प्लुक्षिः, पुं, (प्लुष्यति दहतीति। प्लुष दाहे + "प्लुषिकुषिशुषिभ्यः क्सिः।" उणा० ३। १५५। इति क्सिः।) अग्निः। इत्युणादिकोषः। स्नेहः। गृहदाहः। इति संक्षिप्तसारोणादिवृत्तिः॥

प्लु, ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-अनिट्।) अन्तःस्थतृतीययुक्तः। ङ, प्लवते। इति दुर्गादासः॥

प्लुतं, क्ली, (प्लु + क्तः।) अश्वगतिविशेषः। स च त्वरया झम्पेन गतिः। इत्यमरभरतौ॥ (यथा, अश्ववैद्यके। ३। १३२।
"अथ यः पुच्छतोऽश्वस्य शनैरविशदो ध्वनिः।
अन्तरुत्पद्यते कश्चित्तदश्वप्लुत उच्यते॥")
तिर्य्यग्गतिः। इति कलिङ्गः॥ (यथा, कथासरित्सागरे। २७। १५६।
"तिर्य्यक्तिर्य्यगिवास्य पेतुर्वक्रप्लुता मृगाः॥")

प्लुतः, पुं, (प्लुतं प्लुतवद्गतिरस्यास्तीति। प्लुत + अच्।) त्रिमात्रवर्णः। इति मेदिनी। ते, ३५॥ यथा,—
"एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम्॥"
इति दुर्गादासादिधृतप्राचीनकारिका॥
(तथाच।
"दूराह्वाने च गाने च रोदने च प्लुतो मतः॥"
इति च दुर्गादासधृतवचनम्॥
प्लु + क्तः।) झम्पगतियुक्ते, त्रि॥ (यथा, हरिवंशे। ६८। ८४।
"रामादनन्तरं क्षत्ता प्लुतो वै वीर्य्यवांस्ततः।
ताभ्यामेव प्लुताभ्याञ्च चरणैस्ताड़ितो गिरिः॥"
अन्तर्णिजर्थत्वात् प्लावितः। यथा, बृहत्संहितायाम्। ५। ४४।
"सद्यगते तमसि जगज्जलप्लुतं भवति मुदित-
मभयञ्च॥"
सिक्तः। यथा, याज्ञवल्क्ये। १। २३५।
"अग्नौ करिष्यन्नादाय पृच्छत्यन्नं घृतप्लुतम्॥"
व्याप्तः। यथा, भागवते। ३। २। १४।
"यस्यानुरागप्लुतहासरास-
लीलावलोकप्रतिलब्धमानाः।
व्रजस्त्रियो दृग्भिरनुप्रवृत्त-
धियोऽवतस्थुः किल कृत्यशेषाः॥")

प्लुष, उ दाहे। भस्मीकरणे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०-सक०-सेट्। क्त्वावेट्।) उ, प्लोषित्वा प्लुष्ट्वा। इति दुर्गादासः॥

प्लुष, श सेके। पूर्त्तौ। स्नेहे। इति कविकल्पद्रुमः॥ (क्र्या०-पर०-सक०-स्नेहे अक०-सेट्।) श, प्लुष्णाति। इति दुर्गादासः॥

प्लुष, य ऌ दाहे। इति कविकल्पद्रुमः॥ (दिवा०-पर०-सक०-सेट्।) अन्तःस्थतृतीययुक्तः। य, प्लुष्यति। ऌ, अप्लुषत्। पुप्लोष। इति दुर्गादासः॥

प्लुषः, पुं, दहनम्। इति प्लुषधातोर्भावे अल्-प्रत्ययः॥

प्लुष्टः, त्रि, (प्लुष + क्तः। "यस्य विभाषा।" ७। २। १५। इति इट् न।) दग्धः। इत्यमरः। ३। १। ६६॥ (यथा, ऋतुसंहारे। १। २२।
"पटुतरवनदाहात् प्लुष्टशष्पप्ररोहाः
परुषपवनवेगात् क्षिप्तसंशुष्कपर्णाः॥"